ISSN : 2350-0700

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपत्रिका

A Peer Reviewed Research Journal of Shree Somnath Sanskrit University

# शोधज्योतिः

# ŚODHAJYOTIḤ

Year-1, Vol.-1 January – December 2019

*Chief Editor*
Prof. Gopabandhu Mishra

*Managing Editor*
Prof. Vinod Kumar Jha

*Editors*
Prof. Archana Kumari Dubey
Dr. Janakisharan Acharya
Dr. Kartik Pandya

SHREE SOMNATH SANSKRIT UNIVERSITY, VERAVAL

**Publisher:**

Dr. Dashrath Jadav

*Registrar*, Shree Somnath Sanskrit University, Veraval

**Advisory Committee:**

Prof. P. N. Shastri

*Vice Chancellor,* Rashtriya Sanskrit Sansthan (Deemed University) New Delhi

Prof. Dev Narayan Jha

*Vice Chancellor,*

Prof. Kamlesh Choksi

*Director, Bhasha Bhavan, Gujarat University, Ahmedabad*

Prof. Harshdev Madhav

*Ahmedabad*

Prof. Rabindra Kumar Panda

*Professor,* Department of Sanskrit, Pali & Prakrit, The M S University, Vadodara

Prof. Devendra Nath Pandeya

*Dean,* Faculty of Veda & Vedanga, Shree Somnath Sanskrit University, Veraval

Dr. Narendrakumar L. Pandya

*Principal,* University Constituent Sanskrit College, Veraval

**Managing Editor**

Prof. Vinod Kumar Jha

**Editorial Committee**

Prof. Archana Dubey

Dr. Janakisharan Acharya

Dr. Kartik Pandya

**Note**: The statements and views expressed by the authors of articles in this Journal are their own and not necessarily of the Editorial Committee. The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

*ISSN* : 2350-0700

*Registration No*. : GH/SH/4/GSU/2997/1607/Pt- III/KH-1 dated 11-04-2005

*Published by* : Shree Somnath Sanskrit University, Veraval, Gujarat – 362 266

*Price* : ₹ 100 Annual Subscription (For India)

*Address* : Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat, India – 362 266

*Telephone* : (+91-2876) 244531, 244532

*Email* : shodhjyoti@gmail.com

*Website* : www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

# ŚODHAJYOTIḤ

**A Peer Reviewed Research Journal of Shree Somnath Sanskrit University**

## FORM IV

*(See Rule 8 under Section 5 of the Press and Registration of Book Act, 1867)*

| | | |
|---|---|---|
| 1. | *Place of the Publication:* | Shree Somnath Sanskrit University, Veraval, Gujarat - 362 266 |
| 2. | *Periodicity of its Publication :* | Annual (Yearly) |
| 3. | *Printer's Name :* | Jalaram Graphics & Offset |
| | *Nationality :* | Indian |
| | *Address :* | Near Paramhans Apartment, Behind Kaveri Hotel, S.T. Road, VERAVAL Dist. Gir Somnath, Gujarat - 362 266 |
| 4. | *Publisher's Name :* | The Registrar |
| | *Nationality :* | Indian |
| | *Address :* | Shree Somnath Sanskrit University Rajendra Bhuvan Road, VERAVAL Dist. Gir-Somnath, Gujarat – 362 266 |
| 5. | *Editor's Name :* | Prof. Gopabandhu Mishra |
| | *Nationality :* | Indian |
| | *Address :* | Shree Somnath Sanskrit University Rajendra Bhuvan Road, VERAVAL Dist. Gir-Somnath, Gujarat – 362 266 |
| 6. | *Names & Addresses of Individuals : who own the newspaper and partners or shareholders holding more than one percent of the total capital* | Shree Somnath Sanskrit University Rajendra Bhuvan Road, VERAVAL Dist. Gir-Somnath, Gujarat – 362 266 |

I, Dr. Dashrath Jadav, *Registrar*, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

(Dr. Dashrath Jadav)
Signature of Publisher

# शुभाशंसा

भगवतः श्रीसोमनाथस्य परमानुग्रहेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "शोधज्योतिः" इत्यभिधानं शोधपत्रम् इदम्प्राथम्येन प्राकाश्यमायातीति परमस्य मोदस्यायं विषयो वर्तते।

श्रीसोमनाथो द्वादशसु ज्योतिर्लिङ्गेषु प्रथमज्योतिर्लिङ्गत्वेन सुतरामखिलैः उपास्योऽस्ति। साम्बसदाशिवस्येदं ज्योतिस्स्वरूपं मनसि निधाय तस्य चिदानन्दरूपं सर्वथा सर्वैः ध्यायते। तथा चाह भगवत्पादः आद्यश्रीशङ्कराचार्यः -

"चिदानन्दरूपः शिवोऽहं शिवोऽहम्" इति। प्रसङ्गे एतस्मिन् परमशिवस्य रूपसङ्कल्पनायाम् एकतः "ज्योतिस्स्वरूपम्", अपरतः "चिदानन्दरूपम्" सुतरां द्योतितमस्ति। अर्थात् सकलानां प्राणिनाम् अन्तःकरणे यः परमात्मा शिवस्वरूपः ज्योतिरिव नित्यं द्योतमानमस्ति सः स्वयं प्राणिषु चैतन्यं निदधाति आनन्दं च जनयति। बहिरङ्गतया स्थूलतया दृश्यमाने संसारे प्राणिशरीरे च एतत् सूक्ष्मं सत्त्वं निरीक्षितुं पारेदृश्वानाः ऋषयः दार्शनिकाः प्रभवन्तितराम्। एषा निरीक्षा शोधदृष्टिरित्याख्ययाऽभिधातुं शक्यते। तथा च एतादृश्या शोधदृष्ट्या यत् ज्ञानज्योतिः उदेति तेन समग्रं जगत् उद्भासितं भवति। यद्यपि तमः घनीभूतं व्यापकं विशालं च भवति तथापि लघुकायेऽपि ज्योतिषि एव तम् अपाकर्तुं यत्नः स्वयमेव विद्यमानो भवति। विश्वकविः रवीन्द्रनाथ ठाकुरोऽपि आह - तमोऽस्ति, तमोऽस्ति इति कथनमात्रेण तमः न दूरीभवति, तदर्थम् एको लघुः प्रदीपः ज्वालनीयो भवति। तमः स्वयमेव अपसरति। "शोधज्योति"रित्याख्यं शोधपत्रमिदं संस्कृतं भारतीयां च संस्कृतिमाश्रित्य अखिले जनमानसे यद् भ्रान्तिरूपं तमो व्याप्तमस्ति, तथा च श्रुति-स्मृति-वेदाङ्ग-पुराणोनिषदादि-रामायणमहाभारत-विविधदर्शन-नानाविधकाव्यनाटकादि-नाट्यशास्त्रार्थशास्त्रादि-प्रकाश्यप्रकाशितासंख्याकपाण्डुलिप्यादिगतविषयेषु अज्ञानाल्पज्ञानांशिकज्ञानादिजन्यं यत् तमः प्रसृतमस्ति तदपाकर्तुम् अनवरतं श्रद्धया निष्ठया प्रसरतुतरामिति भगवान् श्रीसोमनाथो भूयो भूयः सम्प्रार्थ्यते।

संस्कृत-हिन्दी-आङ्ग्लेति भाषात्रयेण आत्मनः कलेवरं विभूषयत् शोधपत्रमिदम् अवश्यप्रकाश्यमिति बहुकालतः विश्वविद्यालयेन निर्णये कृतेऽपि एतावतन्तं कालं यावत् प्रकाशितं नासीत्। तदिदानीम् एतस्य प्रथमोऽवतारः प्रभातेऽरुणोदय इव ज्योतिषं विभावयति इति एतदर्थमेतस्य सम्पादने प्रकाशने च तत्परः सहमुख्यसम्पादकः सम्पादकगणः सुतरां श्लाघ्यो विद्यते। एतस्य प्रकाशनाय विश्वविद्यालस्य प्राशासनिको भागो वित्तविभागः शोधसंवर्गश्च धन्यवादैः सभाज्यन्ते।

शोधपत्रमिदं "भानुः सकृद्युक्ततुरङ्ग एव" इति महाकवेः कालिदासस्य वचोऽनुसृत्य अद्यतनात् अरुणोदयादारभ्य अविश्रान्तं नियमिततया प्राकाश्यं व्रजेत् तथा च "पूर्णता गौरवाय" इति विश्वविद्यालयस्य कालिदासोक्तपङ्क्त्याश्रितं ध्येयवाक्यं साधयितुं सर्वथा स्तरीयशोधलेखानां सम्यक्तया प्रामाणिकतया च प्रकाशनेन देशे विदेशेषु च विश्वविद्यालयस्य गौरवं वर्धयेद् इत्येतदर्थं श्रीसोमनाथः शुभानुग्रहं सततं विदध्यात् इति तं सम्प्रार्थ्य विरम्यते।

गोपबन्धु मिश्रः

कुलपतिः

# सम्पादकीयम्

भगवतः ससोमस्य श्रीसोमनाथस्य परमानुग्रहेण यद्विद्वज्जनमनश्चकोरकौमुदी "शोधज्योतिः" इत्यभिधेया श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपुष्करिणीव शोधपत्रिका प्राकाश्यम् आनीयते इति महतः हर्षप्रकर्षस्यायं विषयो वर्तते। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य काचित् शोधपत्रिका स्यादिति विचारः २०१४ तमे वर्षे तत्कालीनकुलपतेः प्रो. वेम्पटिकुटुम्बशास्त्रिणः कार्यकाले सङ्कल्पितः आसीत्। परम् अस्याः शोधपत्रिकायाः प्रकाशनं न सञ्जातम्। अथोऽथ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वर्तमानकुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याणां प्रेरणया मार्गदर्शनेन च अस्याः शोधपत्रिकायाः प्रथमोऽङ्कः प्राकाश्यमानीतो वर्तते।

अस्मिन्नङ्के विद्वज्जनकृतावगाहशास्त्राज्ञानान्विताः नवदशशोधलेखाः विद्यन्ते ये च ननवोन्मेषशालिप्रतिभावतां शास्त्रप्रविविक्षूणां शोधच्छात्राणां कृते नूनम् उपादेयाः सन्ति। एतेषु शोधलेखेषु प्राच्यपरम्परानुरूपं शास्त्रार्थपद्धत्या तथा च युक्तियुक्तं पूर्वापरपक्षव्याख्यापरम्परामनुसृत्य परस्परं प्रतिपदसिद्धान्तसमीक्षणेन वेद-वेदान्त-व्याकरण-दर्शन-साहित्य-ज्योतिषादिविषयाणां गभीरोऽपि विषयः सरलया शैल्या विवेचितो वर्तते। तत्तच्छास्त्रविदुषां गभीरालेखेन सह शोधच्छात्रेष्वपि लेखनकलां वर्धयितुं तेषामपि शोधनिबन्धानामत्र स्थानं कल्पितमस्ति यच्च शोधपत्रिकायाः सर्वोपयोगित्वं साधयति अन्यांश्च प्रेरयति। अत्र केचन शास्त्रीया निबन्धाः प्राच्यव्याख्यानपरम्परां स्मारयन्ति। केचन गभीरतममपि विषयं सर्वजनबोधजनिकां लेखनकलां शिक्षयन्ति।

प्रो. विनोदकुमार झा परमलघुमञ्जूषायाः आलोके नामार्थविचारं प्रास्तौत् स्वकीयशोधपत्रे। मीमांसकास्तावत् शब्दानां शक्तिं जातौ स्वीकुर्वन्ति न तु व्यक्तौ, वैयाकरणास्तु जातिविशिष्टव्यक्तौ शब्दार्थशक्तिम् अभ्युपगच्छन्ति। अत्र प्रो. झावर्येण शास्त्रोक्तरीत्या पूर्वपक्षम् उद्भाव्य वैयाकरणानां मतं प्रमाणैः पुष्टीकृतम्। भवभूतेः कारुण्यं लिखन्ती प्रो. अर्चनादुबे स्वशोधपत्रमाध्यमेन करुणरसं सर्वरसाधाररूपेण प्रास्तौत्। वेदानां संरक्षणे विकृतिपाठाः कथम् उपकुर्वन्तीति विषये डॉ. शत्रुघ्नपाणिग्राही सोदाहरणं व्यवर्णयत्। "अवस्थात्रये वृत्तिविचारः" इति विषये डॉ जानकीशरण

आचार्येण उपनिषत्सु अवस्थात्रयनिरूपणस्य किं प्रयोजनमस्तीति सम्यक् निरूपितम्। कालविषयकं कलनम् अत्यन्तं सूक्ष्मम् अस्ति। सुनिताबेन-ठक्करवर्यया "कालविमर्शः" इत्याख्ये शोधलेखे भारतीयवाङ्मयदिशा कालस्य सूक्ष्मं विवेचनं प्रस्तुतम्। दर्शनशास्त्रेषु प्रसिद्धे सृष्टिकारणवादविषये नैकानि मतानि विद्यन्ते। तत्र ब्रह्मसूत्रशाङ्करभाष्योपरि श्रीमदप्पयदीक्षितैः "न्यायरक्षामणिः" विरचिता वर्तते। तत्र अस्य जगतः कारणं किं हिरण्यगर्भः भवितुमर्हति उत न इति यः विचारः उद्भावितः तमेव अनुसृत्य श्रीगणेशहेगडेवर्यः वेदान्तदर्शनस्य शास्त्रार्थपद्धत्या स्वविषयं सम्यक्तया अमण्डयत्। डॉ. पूनम घई महोदयायाः शोधपत्रम् "लीलावती में काव्यसौन्दर्य" इति ज्योतिषसाहित्ययोः काव्यनिदर्शनविषये सेतुरूपेण विद्यते। प्रो. देवेन्दनाथपाण्डेयः वैदिकधर्मस्य विश्वकल्याणभावनां न्यरूपयत्। धर्मविचारशास्त्रे मीमांसादर्शने प्रतिपादितं धर्मस्वरूपम् अत्र विशदतया वर्णितमस्ति। आधुनिकलेखकेषु हरिनारायण-दीक्षितः सुप्रसिद्धः कविः विद्यते। तत्कृतं भीष्मचरितम् इत्याख्यम् आधुनिकमहाकाव्यं विद्वत्समवाये लब्धप्रतिष्ठितमस्ति। तत्र प्रयुक्तानां छन्दसां विषये डॉ. कार्तिकपण्ड्यावर्यस्य आलेखः रमणीयो वर्तते। ग्रन्थालयो भवति ज्ञानागारः। अतः ग्रन्थालये विद्यमानस्य ग्रन्थपालस्य आधुनिकतन्त्राधारिते काले भूमिकाविषये तस्य कौशलविषये च आलेखः नूनम् उपादेयो विद्यते। डॉ. जयेशमुङ्गरावर्यस्य आलेखोऽपि आधुनिकदृष्ट्या विदधानोऽस्ति।

अत्रावसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्यान् प्रो. गोपबन्धुमिश्रवर्यान् प्रति वयं कार्तज्ञ्यं विनिवेदयामः। येषां सततं मार्गदर्शनम् अस्याः शोधपत्रिकायाः प्रकाशने हेतुभूतमस्ति। प्रकाशने सर्वविधप्राशासनिकसहयोगं प्रदत्तवद्भ्यः कुलसचिवेभ्यः डॉ. दशरथजादववर्येभ्यः धन्यताभणितयः भण्यन्ते। अस्याः शोधपत्रिकायाः सन्दर्भितपुनरीक्षणे ये विद्वांसः साहाय्यमकार्षुः तान् प्रति कार्तज्ञ्यपुष्पाणि समर्प्यन्ते। अस्याः पत्रिकायाः मार्गदर्शनसमितिसदस्यानामपि यथाकालं मार्गदर्शनं प्राप्तं तस्मात् तान् प्रत्यपि नमोवाकं प्रशास्महे।

अन्ते ते सर्वेऽपि विद्वांसः प्रणम्याः समभ्यर्चनीयाः सन्ति येषामालेखेन पत्रिकेयं गौरवान्विताऽभूत्। ते चाभिवन्दनीया ये प्रकाशने सर्वथा सहयोगं प्रदायानुगृहीतवन्तः।

विद्वज्जनविधेयाः सम्पादकाः

**प्रो. अर्चनाकुमारी दुबे**

**डॉ. जानकीशरण आचार्यः**

**डॉ. कार्तिकपण्ड्या**

# विषयानुक्रमणिका


| | | |
|---|---|---|
| १. नामार्थविचारः (परमलघुमञ्जूषायाः परिप्रेक्ष्ये) | प्रो. विनोद कुमार झा | १ |
| २. कारुण्यं भवभूतिरेव तनुते | प्रो. अर्चनाकुमारी दुबे | ७ |
| ३. अभिज्ञानशकुन्तलङ्लविमर्शः तत्र शिवतत्त्वञ्च | डॉ. ललितः पटेलः | १५ |
| ४. वेदानां संरक्षणे विकृतिपाठानां योगदानम् | डॉ. शत्रुघ्न पाणिग्राही | २१ |
| ५. अवस्थात्रये वृत्तिविचारः | डॉ. जानकीशरण आचार्यः | २७ |
| ६. कालविमर्शः | सुनिताबेन के. ठक्कर | ३३ |
| ७. ज्यौतिषशास्त्रान्यग्रन्थानां सम्मते संस्काराणाम् आधुनिकयुगे महत्त्वम् | डॉ. रमेशचन्द्र शुक्लः | ४९ |
| ८. रसगङ्गाधरे उत्तमोत्तमकाव्यस्योदाहरणे व्यङ्ग्यविमर्शः | जिगर एम्. भट्टः | ६१ |
| ९. काव्यभेदा: | डा. यस्. वि. बी. के. गुप्ता | ६७ |
| १०.वास्तुशास्त्रानुसारं वाटकानिर्माणविधानम् | डॉ. हेमुबेन महेश राठौड | ७१ |
| ११.न्यायकौस्तुभे सङ्गतिनिरूपणम् | मेडूरि. सूर्यनारायणः | ७९ |
| १२.हिरण्यगर्भजगत्कारणत्ववादनिरासः | डॉ. गणेश हेगडे | ८३ |
| १३.गर्भाधान संस्कार | प्रो. कश्यप एम्. त्रिवेदी | ९३ |
| १४.लीलावती में काव्यसौन्दर्य | डॉ. पूनम घई | १०१ |
| १५.Vedic Dharma: A Glorious Theory of Universal Humanity | Prof. D. N. Pandeya | १११ |

१६. Metrical Nuances in BhīṢmacaritam of Hari Narayan Dikshit

Kartik Pandya १२१

१७. Competences and Skills for Librarian in Electronic Era

Ravindra S Kale १४५

१८. Nutrition in Sports — Dr. Jayesh D. Mungara १५१

१९. Yoga for Athletes — Rekhaben H. Kachadiya १५५

नक्षत्राणि नक्षत्रेर्गतिकर्मणः। अयं प्राचीनः भारतीय ज्यौतिषसिद्धान्तः अस्ति - मर्त्यलोके पुण्यं कुर्वाणाः पुण्यात्मानः देहत्यागात् अनन्तरं स्वर्गं प्रति नक्षत्ररूपेण गतिं कुर्वन्ति ते च तत्र देवरूपेण विराजन्ते। तथा हि देवगृहा वै नक्षत्राणि।

३. पृथिव्यां वर्तमानानां विविधानां पदार्थानां चित्राणि भवन्ति इति नक्षत्राणि। अर्थात् तेषां पदार्थानाम् आकृत्यनुसारेण नक्षत्राणां भवन्ति। तै.ब्रा.१.५.२

४. न क्षरन्ति = विनाशं गच्छन्ति इति नक्षत्राणि इति व्युत्पत्तिः सामान्यतया ज्यौतिषशास्त्रे रूढा अस्ति।

"नक्षत्र" शब्द व्युत्पत्तिरेव न, ब्राह्मणादिप्राचीनवैदिकसाहित्ये तस्य तस्य नक्षत्रस्य नाम्नः व्युत्पत्तिः अपि उदाहरणादिपुरस्सरं प्रदर्शिता दृश्यते। तथा हि प्रकारान्तरेण अपि नक्षत्रस्य पर्यायवाचकशब्दस्य "तारका" इति प्रसिद्धस्य व्युत्पत्तिः प्रदर्शिता तथा हि "सलिलं" वा इदम् अन्तरासीत्। यदतरन्त्। तत्तारकाणां तारकत्म्। "**अर्थात् सलिलमयात् अन्तरिक्षात् याः तारयन्ति ताः तारकाः**। तै.ब्रा.१.५.२ वास्तविकतया शिष्टसंस्कृते (Classical Sanskrit) "तारका" नाम अक्ष्णः कनीनिका। "तारिका" नाम या तारयति सा तारिका। एतेन स्पष्टं भवति यत् वेदे "तारका" नाम नक्षत्रम्, अयं आर्षः प्रयोगः।

ऋग्वेदसंहितायां तथा अथर्वसंहितायामपि "तारा" शब्दः नक्षत्र अर्थे प्रयुक्तः दृश्यते। क्रमशः १०.६८.११ तथा १३.२.१७ "द्योरवि स्मयमानो नभोभिः "इति ऋग्वेदमन्त्रे नभः शब्दोऽपि नक्षत्रवाचकः अस्ति। नक्षत्राणामेषामुपस्थे सोम आहितः इति ऋग्वेदे "नक्षत्र" शब्दस्य अर्थः चन्द्रस्य भ्रमणमार्गः।

केषांचित् नक्षत्राणां व्युत्पत्तयः उचितबोधाय प्रस्तूयन्ते-

५. पुनर्वसू– पुनः पुनः वस्तारौ, अर्थात् स्तोतॄणाम् आच्छादयितारौ भवतः तौ "पुनर्वसू"। तारकाद्वयं अस्मिन् नक्षत्रे वर्तते, अतः अयं शब्दः द्विवचनानाः इति प्रदर्शयितुं "पुनर्वसू" इति दीर्घान्तरूपं प्रस्तुतम्।

६. मघा- विचित्रधना भवति इति मधा। यास्काचार्येण निरूक्ते उक्तम्– मधमिति धननामधेयं, महतेर्दानकर्मणः। निरूक्तम् १.७

७. ऋग्वेदसंहितायां निरूपितं यत् सवितुः कन्या सूर्याख्या स्त्रीधनरूपेण सोमाय प्रदत्ता। ताः गावः प्रथमं मधानक्षत्रे एव अपवाहिताः। शतपथब्राह्मणग्रन्थे अपि अयमर्थः प्रदर्शितः, तथा हि– "मधासु" हन्यन्ते गावः। शतपथब्राह्मणम् २.१.२.११

८. रेवती– रेवती नाम धनवती। "रै" शब्दः धनवाची वेदेषु दृश्यते। राः (धनम्) अस्याः अस्ति इति रेवती। ऋक्संहितायाम् उक्तम्। "स्वस्ति पथ्ये रेवती" ऋ.सं. ६.५१.१४।

९. रोहिणी:- अस्या नाम्नः व्युत्पत्तिविषये रोचिष्णुः कथा ऐतरेय ब्राह्मणे (१३.९) प्रदत्ता, तथा हि प्रजापतिः स्वां दुहितरम् अकामयत्। सा रोहिद्भूता (हरिणी रूपे परिणता)। प्रजापतिः अपि तां समीहमानः एणः (हरिणः) संबभूव। अथ पशुपतिः शिवः व्याधरूपं गृहीत्वा प्रजापतिं विदधम् अकार्षोत्। अतः प्रजापतिः मृगः उच्यते, पशुपतिः "मृगव्याधः" उच्यते तथा रोहिद्रूपे परिणतत्वात् प्रजापतिकन्या "रोहिणी" इति उच्यते। अयं भावः श्रीपुष्पदन्तविरचिते शिवमहिम्नस्तोत्रे अतिरमणीयतया प्रदर्शितः तथा हि प्रजानाथं नाथ प्रसभमभिकं स्वा दुहितरं

**प्रजानाथं प्रसभमभिकं स्वां दुहितरं**
**गतं रोहिण्द्भूतां रिरमयिषुमृष्यस्य वपुषा।**
**धनुष्पाणेर्या दिवमपि सपत्राकृतममुं**
**त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः॥** - शिवमहिम्नस्तोत्रम्, श्लोक-२२




तैत्तिरीयब्राह्मणे "रोहिणी" नक्षत्रसम्बन्धिनी कथा प्रकारान्तरेण प्रदर्शिता तथा हि- प्रजापतिः स्वां कन्या प्रति मुग्धः जातः। सा लज्जावशात् सर्वासु दिक्षु क्रमशः आत्मानं जुगोपियुः अधावत्। सर्वत्र पिता प्रजापतिः ताम् अन्वधावत्। अन्ते सा कन्या ऊर्ध्वम् आरुरोह। सा रोहिणी अभवत्। तद् रोहिण्याः रोहिणीत्वम्।

१) पुनर्वसू:- भद्रं भवेत् सर्वेषाम् इति कामनया देवताः अग्निम् आद्यातुम् ऐच्छन्, किन्तु तेषाम् अग्निः आधानरहितः एव अभवत्। अतः वसुः तस्मात् स्थानात् अपावर्तत। ते पुनर्वसुनक्षत्रे आधानम् अकार्षुः। तदा उत्तमः पूर्वोक्तमः वसुः उपावर्तत, अतः तन्नक्षत्रम् "पुनर्वसूः" इति उच्यते।

२) हस्तः पञ्चतारायुक्तं नक्षत्रमेतत् हस्ताकारमस्ति अतः हस्तः इति उच्यते।

मघा - चित्रा नक्षत्रं, मघा नक्षत्रं च सूर्यस्य योषितौ सतः इति ऋक्संहितायाम् (७.७५.५) निरूपितम्।

ऋक्संहितायाम् अन्येषामपि नक्षत्राणामुल्लेखः ऋक्षशब्देन काव्यात्मकतया, तत्त्वज्ञानात्मकतया च कृतः। यथा - अमी च ऋक्षा निहितास उच्चा नक्तन्ददृशे कुहचिदिदेवयुः अर्थात् एतानि यानि नक्षत्राणि रात्रौ उच्चैः स्थाने, प्रकाशन्ते तानि दिवसे कुत्रापि न दृश्यन्ते, न जाने कुत्र आत्मानं निहनुवते? गोपथब्राह्मणे वर्णितं यत् स्वर्भानुः (राहुः) तमसा सूर्यं विद्धवान् तथा अत्रिऋषिः तम् अपनोदितवान्। ताण्डयमहाब्राह्मणे अपि ग्रहणस्य उल्लेखः लभ्यते (४.५.२) तैत्तिरीयब्राह्मणे निरूपितं यत् कृत्तिकादिषु कतिपयेषु नक्षत्रेषु अग्न्याधानं कर्तव्यम्। मृगनक्षत्राम् पूर्वस्यां दिशि आकाशगङ्गाम् अभितः व्दयोः तारकयोः पुञ्जः वर्तते। पाश्चात्यज्यौतिषिका आहुः तयो एकः canis major (बृहल्लुब्धकः) तथा अन्य canis minor (लघुलुब्धकः) इति उच्यते। द्वौ श्वानौ इति नाम्ना अपि तौ प्रसिद्धौ। पाश्चात्यविदुशामनुसारेण पुनर्वसुपुष्यनक्षत्रयोः समीपे आलोक्मानः तारकापुञ्जः Navis (नौः नौका) हिरण्मयी आकाशनौका इति उच्यते। हस्तनक्षत्रस्य पञ्च तारकाः सन्ति। तासाम् आकारः हस्ताकारः दृश्यते, अतः तस्य "हस्तः" इति संज्ञा अजनिष्ट। तैत्तरीयब्राह्मणे नक्षप्रजापतिवर्णनं वर्तते, यथा हस्तनक्षत्रं प्रजापतेः हस्तः, चित्रा शिरः, निष्टया हृदयम् विशाखायाः तारकाद्वयं तस्य द्वे जङ्घे इत्यादि। (वामनपुराण- नक्षत्रपुरुषं आकृतिः)

ज्यौतिषशास्त्रस्य प्रारम्भे अपि भारतीयानां विदुषां मनसि नक्षत्रज्ञानं पूर्णमासीत्। ते अजानन् यत् सम्पातबिन्दुः भरणीनक्षत्रस्यम् चतुर्थं चरणम् आसीत्। अत एव वौदिक काले नक्षत्रगणाना कृत्तिकानक्षत्रतः भवति स्म। प्रश्नव्याकरणाङ्गे नक्षत्रफल विवरणं विशिष्टतया कृतम्। नक्षत्रफलं त्रिषु भागेषु तस्मिन् ग्रन्थे विभक्तम्, यथा–

| **कुलनक्षत्राणि** | **उपकुलनक्षत्राणि** | **कुलोपकुलनक्षत्राणि** |
|---|---|---|
| धनिष्ठा | श्रवणम् | |
| उत्तराभाद्रपदा | पूर्वाभाद्रपदा | अभिजित् |
| अश्विनी | रेवती | शतभिषा |
| कृत्तिका | भरवी | आर्द्रा |
| मृगशिरः | रोहिणी | अनुराधा |
| पुष्यम | पुनर्वसू | |
| मधा आश्लेषा | | |
| उत्तराफाल्गुनी | पूर्वाफाल्गुनी | |
| चित्रा | हस्तः | |

| | |
|---|---|
| विशाखा | स्वातिः |
| मूलम् | ज्येष्ठा |
| उत्तराषाढा | पुर्वाषाढा |

द्वाररूपेणं अपि नक्षत्राणां विभजनं प्राचीनग्रन्थेषु उपलभ्यते।

| **पूर्वद्वारम्** | **दक्षिणद्वारम्** | **पश्चिमद्वारम्** | **उत्तरद्वारम्** |
|---|---|---|---|
| कृतिका | मधा | अनुराधा | धनिष्ठा |
| रोहिणी | पूर्वाफाल्गुनी | ज्येष्ठा | शतभिषा |
| मृगशिरः | उत्तराफाल्गुनी | मूलम् | पूर्वाभाद्रपदा |
| आर्द्रा | हस्तः | पुर्वाषाढा | उत्तराभाद्रपदा |
| पुनर्वसू | चित्रा | उत्तराषाढा | रेवती |
| पुष्यम् | स्वातिः | अभिजित् | अश्विनी |
| आश्लेषा | विशाखा | श्रवणम् | |

प्रत्येकं नक्षत्रस्य देवता वर्तते, तद् अधःकोष्ठे प्रदर्श्यते

| अङ्क | नक्षत्रम् | देवता | नक्षत्रम् | देवता |
|---|---|---|---|---|
| १ | कृतिका | अग्निः | स्त्री. | बहवः |
| २ | रोहिणी | प्रजापतिः | स्त्री. | एका |
| ३ | १,३,४ मृगशीर्ष<br>२ इन्वका | सोमः<br>सोमः | नपुंसक<br>स्त्री. | एका<br>बहवः |
| ४ | १,३,४ आर्द्रा<br>२ बाहु | रुद्रः<br>रुद्रः | स्त्री.<br>पु. | एका<br>द्वे |
| ५ | पुनर्वसु | अदितिः | पु. | एका |
| ६ | तिष्य | बृहस्पतिः | पु. | एका |
| ७ | आश्लेषा | सर्पः | स्त्री. | बहवः |
| ८ | मधा | पितृ. | स्त्री. | बहवः |
| ९ | १,३,४ फल्गुनी<br>२ पूर्वफल्गुनी | अर्यमा<br>अर्यमा | स्त्री.<br>स्त्री. | द्वे<br>द्वे |
| १० | १,३,४,<br>२ उत्तरफल्गुनी | भग<br>भग | स्त्री.<br>स्त्री. | द्वे<br>द्वे |
| ११ | हस्त | सविता | पु. | एका |
| १२ | चित्रा | १, २ इन्द्र | स्त्री. | एका |

| | | | | |
|---|---|---|---|---|
| | | ३, ४ त्वष्टा | | |
| १३ | १ स्वाती | वायुः | स्त्री. | एका |
| १४ | २,३,४ निष्टचा | इन्द्राणी | स्त्री. | द्वे |
| १५ | अनुराधा | मित्रः | स्त्री. | बहवः |
| १६ | १, रोहिणी ३ ४ ज्येष्ठा | इन्द्रः | स्त्री. | एका |
| १७ | १ विचृतौ | पितरः | पु. | द्वे |
| | २ मूलबर्हणी | निर्ॠतिः | स्त्री. | एका |
| | ३ मूलम् | निर्ॠतिः | नपु. | एका |
| | ४ मूलम् | प्रजापतिः | नपु. | एका |
| १८ | १,३,४ आषाढा | आपः | स्त्री. | बहवः |
| | १ पूर्वाषाढा | आपः | स्त्री. | बहवः |
| १९ | १,३,४ आषाढा<br>२ उत्तराषाढा<br>३, ४ अभिजित | विश्वेदेवाः<br>विश्वेदेवाः<br>ब्रह्म | स्त्री.<br>स्त्री.<br>नपु. | बहवः<br>बहवः<br>एका |
| २० | श्रविष्ठा | वसुः | स्त्री. | एका |
| २१ | श्रविष्ठा | वसुः | स्त्री. | बहवः |
| २२ | शतभिषक् | १, २ इन्द्रः<br>३, ४ वरुण | पु.<br>पु. | एका<br>एका |
| २३ | १,३,४ प्रोष्ठपद<br>२ पूर्व प्रोष्ठपद | अजएकपादं<br>अजएकपादं | पु.<br>पु. | बहवः<br>बहवः |
| २४ | १,३,४ प्रोष्ठपद<br>२ उत्तर प्रोष्ठपद | अहिर्बुध्न्य<br>अहिर्बुध्न्य | पु.<br>पु. | बहवः<br>बहवः |
| २५ | रेवती | पूषा | स्त्री. | एका |
| २६ | अश्वयुज | अश्विन | स्त्री. | द्वे |
| २७ | अपभरणी | यमः | स्त्री. | बहवः |

वामनपुराणे नक्षत्राणां नक्षत्रपुरुषरूपेण विवरणं समुपलभ्यते तथा हि - वामनपुराणे अशीतिमे अध्याये नारदपुलस्त्य-ऋषिसंवादे पुलस्त्यऋषिमुखेन नक्षत्रपुरुषस्य अद्भुतं विवरणं वर्तते, यथा–

| **क्रमः** | **नक्षत्रम्** | **नक्षत्रपुरुषाङ्गम्** | **क्रमः** | **नक्षत्रम्** | **नक्षत्रपुरुषाङ्गम्** |
|---|---|---|---|---|---|
| १ | मूलम् | चरणौ | १५ | हस्तः | हस्तौ |
| २ | रोहिणी | जङ्घे | १६ | पुनर्वसू | अङ्गुलयः |
| ३ | अश्विनी | जानुनी | १७ | आश्लेषा | नरवाः |

| | | | | | |
|---|---|---|---|---|---|
| ४ | पूर्वाषाढा | ऊरुव्दयम् | १८ | ज्येष्ठा | ग्रीवा |
| ५ | उत्तराषाढा | | १९ | श्रवणम् | कर्णौ |
| ६ | पूर्वाफाल्गुनी | गृह्यप्रदेशः | २० | पुष्यम् | मुखम् |
| ७ | उत्तराफाल्गुनी | | २१ | स्वातिः | दन्ताः |
| ८ | कृत्तिका | कटिः | २२ | शतभिषा | हनुद्वयम् |
| ९ | पूर्वाभाद्रपदा | पार्श्वद्ववयम् | २३ | मधा | नासिका |
| १० | उत्तराभाद्रपदा | | २४ | मृगशीर्षम् | नेत्रद्वयम् |
| ११ | रेवती | कुक्षिद्वयम् | २५ | चित्रा | ललाटम् |
| १२ | अनुराधा | हृदयम् | २६ | भरणी | शिरः |
| १३ | धनिष्ठ | पृष्ठदेशः | २७ | आर्द्रा | केशाः |
| १४ | विक्षरवा | भुजद्वयम् | | | |

नक्षत्रपुरुषस्य आराधनविषये विस्तरशः विवरणम् अस्मिन् प्रकरणे कृतम्, जिज्ञासुभिः तत् तत्रैव द्रष्टव्यम्। नक्षत्रविषये कराक्षरूपेण विवरणं बृहत्संहितायां तथा मुहूर्तचिन्तामणेः पीयूषधाराटीकाया लभ्यते। व्याकरणसम्प्रदाये यः प्रकृतिविभाग - प्रत्ययविभागयोः विषये आगनन् प्रक्रिया विषये प्रश्ने कृते केवलम् आकाशे पश्यन् स्मरणस्य नाट्यं रचयति सः वैयाकरणखसूचिः (a stuffless grammarian) इति उच्यते। एवं कुत्सितः वैद्यः भिषक्पाशः इति उच्यते, एतादृशः मीमांसकः मीमोसकदुर्दसढः इति उच्यते। एवं ज्यौतिषिकः अपि नक्षत्रसूचिः इति उच्यते। तस्य विषये सांक्षिप्त टिप्पणी अधो लिख्यते–

**अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते।**
**स पड्क्तिदूषकः पापो ज्ञेयो नक्षत्रं सूचकः॥** (बृ.सं.२.१७)
**तिश्युत्पत्तिं न जानन्ति ग्रहाणां नैव साधनम्।**
**परवाक्येन वर्तन्ते ते वै नक्षत्रसूचकाः॥** (मुहूर्तचिन्तामणौ पीयूषधारा टीका)

## नक्षत्रम्

"दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता त्रिदिनजनितदोषं तन्त्रविज्ञः स एव। करणभगवणवेत्त हन्त्यहोरात्रदोषं जनयति धनमंहश्चात्र नक्षत्रसूची॥ (पीयूषधारां टीका)

"गृहे गृहे गत्वा अपृष्ट एव नक्षत्राणि अखिनी-आदीनि, शुभ-अशुभ- मलसूचकानि सूचयति इति नक्षत्रसूची। (पीयूषधारां टीका)

व्याकरणशास्त्रे महर्षिपाणिनिना अपि ज्यौतिषविषयकाणि नौकानि सूत्राणि प्रयुक्तानि। तेषु सूत्रेषु नक्षत्रविषयकाणि अपि कतिचित् सूत्राणि वर्तन्ते, यथा–

१) फल्गुनीप्रोष्ठपदानां च नक्षत्रे (१.२.६०) पा. सू.
२) लिङ्-चोर्ध्वमौहूर्तिके (३.३.१६४) पा. सू.
३) रेवत्यादिभ्यष्ठक् (४.१.१४६) पा. सू.
४) नक्षत्रेण युक्तः कालः (४.२.३) पा. सू.
५) बिभाषा फाल्गुनी (४.२.२२) पा. सू.
६) श्रावण्या... वसन्तादिभ्यष्ठक् (४.२.६२) पा. सू.

अपरं च सर्वेषां भारतीयमासानां नामानि नक्षत्रम् आधारीकृत्य निर्मितानि। नक्षत्रेण युक्तः कालः साऽस्मिन्पौर्णमासी इत्यादि पाणिनि सूत्रैः तानि नामानि व्युत्पादितानि। तथा हि–

| **मासनाम** | **पौर्णमास्यां विद्यमानं नक्षत्रम् (प्रायः)** |
|---|---|
| १) कार्तिकः | कृतिका |
| २) मार्गशीर्षः | मृगशीर्षक |
| ३) पौषः | पुष्यम् |
| ४) माधः | मधा |
| ५) फाल्गुनः | उत्तराफाल्गुनी |
| ६) चैत्रः | चित्रा |
| ७) वैशाखः | विशाखा |
| ८) ज्येष्ठः | ज्येष्ठा |
| ९) आषाढः | उत्तराषाढा |
| १०) श्रावणः | श्रवणम् |
| ११) भाद्रपदः | उत्तराभाद्रपदा |
| १२) आश्विनः | अश्विनी |

एतेन नक्षत्राणां जीवने कियन्मूल्यमस्ति इति स्पष्टतया दृश्यते। अथर्ववेदे नक्षत्रविषयकाः त्रयो मन्त्राः अवधेयाः सन्ति, यथा -

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि। तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम्॥ (अथर्ववेदः १९.७.१)। अस्य सारांशः - सौरमण्डले अनेकानि गुणान्वितानि नक्षत्राणि सन्ति। प्रतिदिनम् अहं सुमतिं प्राप्तिकाः तानि अर्चयानि, तेन सुखं लभेऽहम्। यानि नक्षत्राणि

दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु। प्रकल्पयँश्चन्द्रमा यान्वेन्ति सर्वाणिममैतानि शिवानिं सन्तु॥ अस्य सारांशः यानि यानि नक्षत्राणि चन्द्रमाः समर्थानि कुर्वन् प्रयाति तानि तानि नक्षत्राणि जले, भूमौ, अन्तरिक्षे वाचरतो मम शुभं कुर्वन्तु।

**अष्टाविंशानि शिवानि शग्मानि सहयोगं भजन्तु मे ।**
**योगं प्रपद्ये क्षेमं च क्षेमं प्रपद्ये योगं च नमोऽहोरात्राभ्यामस्तु॥**[२०]

अस्य सारांशः अष्टाविंशतिः नक्षत्राणि मम कल्याणकारकं, सुखकारकं च सर्वं प्रयच्छन्तु। मयि सामर्थ्यम् एतु, अहं मम रक्षाविद्यौ सपर्थो भवेयम्। अहोरात्राभ्यां मे नमः अस्तु। नक्षत्र– ग्रहयोः भेदः - आकाशीय तेजः पुञ्जेषु नक्षत्र-ग्रहयोः उभयोः समावेशः अस्ति।

**नक्षत्रव्याख्याः -** तेजः पुञ्जा तु वीक्ष्यन्ते गगने रजनीषु ये।
नक्षत्रसंज्ञकाकास्ते तु न क्षरन्तीति निश्चलाः॥

**ग्रहव्याख्या -** विपुलाकारवन्तोऽन्ये गतिमन्तो ग्रहाः किल।
स्वगत्य भानि गृह्णन्ति यतोऽतस्ते ग्रहाभिधाः॥ -बृहत्पाराशरहोराशास्त्रम्

## सन्दर्भग्रन्थाः


१. मुहूर्तचिन्तामणिः पीयूषधाराटीकासहितः
२. बृहत्संहिता
३. बृहत्पाराशरहोराशास्त्रम्
४. वामनपुराणम्
५. पाणिनीया अष्टाध्यायी
६. भारतीयज्योतिषम् - नेमिचन्द्रशास्त्री
७. भारतीय ज्यौतिषम् - शंकरबालकृष्णदीक्षितः, झारखंडी-अनुवादसहितम्
८. निरुक्तम् - यास्काचार्याः
९. वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः


[२०] अथर्ववेदः १९.८.२

# ज्यौतिषशास्त्रान्यग्रन्थानां सम्मते संस्काराणाम् आधुनिकयुगे महत्त्वम्

**डॉ. रमेशचन्द्र बाबूलाल शुक्लः***

ज्योतिषां=सूर्यादिग्रहाणां बोधकं शास्त्रं ज्योतिषशास्त्रम्। सूर्यादिग्रहाणाम् एवं कालस्य बोधं यत् शास्त्रं कारयति तत् शास्त्रं ज्योतिषशास्त्रं कथ्यते।[१] यथा स्मृत्यादिधर्मसूत्राणि वेदस्य व्याख्यारूपेण लभ्यन्ते तथैव ज्योतिषशास्त्रं वेदस्य अङ्गरूपेण वर्तते। संस्काराणां संख्यानिर्धारिणे स्मृतिकाराणां वैमत्यं दृश्यते। गौतमधर्मसूत्रस्य अष्टमाध्याये चतुर्दशसूत्रतः चतुर्विंशतिसूत्रपर्यन्तं चत्वारिंशतः संस्काराणां विवेचनं वर्तते।[२] आदौ तेषां संस्काराणां नामानि पश्चाद् आत्माया अष्टशीलगुणानां वर्णनम्-

(१) गर्भाधानसंस्कारः (२) पुंसवनसंस्कारः (३) सीमन्तोन्नयनसंस्कारः (४) जातकर्मसंस्कारः
(५) नामकरणसंस्कारः (६) अन्नप्राशनसंस्कारः (७) चौलसंस्कारः (८) उपनयनसंस्कारः।
**चतुर्वेदव्रतः -** (९) ऋग्वेदः (१०) यजुर्वेदः (११) सामवेदः
(१२) अथर्ववेदः (१३) स्नानम् (समावर्तनम्) (१४) विवाहः (१५) पञ्चमहायज्ञः- देवः
(१६) पितृयज्ञः (१७) मनुष्यः (१८) भूतयज्ञः (१९) ब्रह्मयज्ञः।
**सप्तपाकयज्ञः -** (२०) अष्टका (२१) पार्वणः (२२) पालीपाकः
(२३) श्राद्धः (२४) श्रावणी (२५) अग्रहायणी (२६) चैत्री
(२७) आश्वयुजी सप्तहविर्यज्ञः - (यस्मिन् होमः भवति सोमः नैव भवति) (२८) अग्न्याधानम्
(२९) अग्निहोत्रम् (३०) दर्शपूर्णमासः (३१) आग्रयणः (३२) चातुर्मास्यः
(३३) निरुपशुबन्धः (३४) सोत्रामणिः (३५) **सप्तसोमयज्ञः-** अग्निष्टोमः
(३६) अत्यग्निष्टोमः (३७) उक्थ्यः (३८) षोडशी (३९) वाजपेयः

(४०) अतिरात्रः (आप्तोर्यामः) एवं एते सप्तसोमयज्ञसंस्कारा एवं चत्वारिशंत् संस्काराः विवर्णिताः सन्ति।[३] धर्मशास्त्रेतिहासस्य द्वितीयाध्यायस्य चतुर्थे श्लोके संखटीकायां मिताक्षराटीकायाञ्च

---

* सहायकाचार्यः, ज्यौतिषशास्त्रविभागः, श्री सोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गीरसोमनाथजनपदः

[१] भारतीयज्योतिषम् (नेमिचन्द्रशास्त्री) , पृ.१

[२] गौतमधर्मसूत्रम्, पृ.७९ तः ८१, १४ सूत्रतः २४ पर्यन्तम्।

[३] धर्मशास्त्रेतिहासः, पृ.१६६

सुबोधिनीगौतमस्य च संख्यां मन्यते।[४] तथैव वैखानसागमे अष्टादशसंस्काराणां वर्णनं प्राप्यते।[५] तथैव अङ्गिराऋषिणा संस्कारमयूखे, संस्कारप्रकाशे एवम् अन्यनिबन्धेषु पञ्चविंशतिसंस्काराः उपलभ्यन्ते। आचार्यव्यासः (१/१४/१५) षोडशसंस्काराणां विवर्णनं कृतवान्। मनुः याज्ञवल्क्यश्च विष्णुधर्मसूत्रे कामपि संख्यां न प्रदत्तवन्तौ प्रत्युत गर्भाधाननिषेकतः श्मशानान्त्येष्टिपर्यन्तं संस्काराणां सङ्केतं कृतवन्तौ। गौतमादिकतिपयधर्मसूत्रेषु अन्त्येष्टिसंस्कारस्य गणना एव न कृता। निबन्धेषु अधिकांशतः षोडशसंस्काराणां संख्या प्रदत्ताऽस्ति। यथा-

(१) गर्भाधानसंस्कारः (२) पुंसवनसंस्कारः (३) सीमन्तोन्नयनसंस्कारः (४) विष्णुबलिसंस्कारः
(५) जातकर्मसंस्कारः (६) नामकरणसंस्कारः (७) निष्क्रमणसंस्कारः (८) अन्नप्राशनसंस्कारः
(९) चौलसंस्कारः (१०) उपनयनसंस्कारः वेदव्रतचतुष्टयम्- (११) ऋग्वेदव्रतसंस्कारः
(१२) यजुर्वेदव्रतसंस्कारः (१३) सामवेदव्रतसंस्कारः (१४) अथर्ववेदव्रतसंस्कारः
(१५) समावर्तनसंस्कारः (१६) विवाहसंस्कारः

एवं षोडशसंस्काराः प्रदत्ताः सन्ति।[६] तथैव स्मृतिचन्द्रिका-द्वारोद्धृत-जातूकर्ण्यग्रन्थेषु एतेषां षोडशसंस्काराणां वर्णनं विद्यते यथा -

(१) गर्भाधानसंस्कारः (२) पुंसवनसंस्कारः (३) सीमन्तोन्नयनसंस्कारः (४) जातकर्मसंस्कारः
(५) नामकरणसंस्कारः (६) अन्नप्राशनसंस्कारः (७) चौलसंस्कारः (८) मौञ्जीसंस्कारः (उपनयनम्) **व्रतचतुष्टयम् -** (९) ऋग्वेदव्रतसंस्कारः (१०) यजुर्वेदव्रतसंस्कारः
(११) सामवेदव्रतसंस्कारः (१२) अथर्ववेदव्रतसंस्कारः (१३) गोदानसंस्कारः
(१४) समावर्तनसंस्कारः (१५) विवाहसंस्कारः (१६) अन्त्येष्टिसंस्कारः

अत्र व्यासद्वाराप्रदत्तनामावलीतः काचिद् भिन्नता दृश्यते।[७] व्यासोपदिष्टषोडशसंस्काराणां प्रमाणं हृषीकेशपञ्चाङ्गे यथा- मानवस्य प्रतिपदम् अर्थात् सम्पूर्णजीवनं संस्कारयुक्तं भवेत् तदर्थं संस्काराः महत्त्वपूर्णाः वर्तन्ते। एतेषु संस्कारेषु गर्भाधानसंस्कारः मुख्यः, एतत्संस्कारानन्तरमेव अन्येषां संस्काराणां प्रवृत्तिः भवति। मनुस्मृतेः द्वितीयाध्यायस्य षोडशे षडविंशतितमे च श्लोके, याज्ञवल्क्यस्य १/१०/११तमे सूत्रे, विष्णुधर्मसूक्तस्य २/३तमे एवं २७/१तमे सूत्रे निषेकः गर्भाधानसदृश एव मन्यते। शांखायनगृह्यसूत्रे (१/१८/१९तमे), पारस्करगृह्यसूत्रे (१/११तमे) तथा आपस्तम्बगृह्यसूत्रे

---

[४] धर्मशास्त्रेतिहासः, पृ.१७१

[५] धर्मशास्त्रेतिहासः, अध्यायः ६ पृ.१७७

[६] धर्मशास्त्रेतिहासः, (पी. वी. काणे), पृ.१७८

[७] धर्मशास्त्रेतिहासः, (पी. वी. काणे), षष्ठतमोऽध्यायः, पृ.१७७

(८/१०/११तमे) सूत्रे चतुर्थीकर्मणः चतुर्थीहोमस्य वा क्रिया यथावदेव भवति तथा सर्वत्रगर्भाधानार्थं प्राप्यते।[८] एवं गर्भाधानस्य कृते पृथक्वर्णनं नहि प्राप्यते। किन्तु बौधायनगृह्यसूत्रे (४/६/१तमे), काककगृह्यसूक्ते (३०-८तमे), गौतम (८/१४तमे) एवं याज्ञवल्क्यस्य (१/११तमे) गृह्यसूत्रे गर्भाधानशब्दस्य प्रयोगः प्राप्यते। वैखानस (३/१०तमस्य) अनुसारेण गर्भाधानस्य संस्कारक्रिया, निषेकेण ऋतुसंगमनस्य मासिकप्रवाहानन्तरविवाहितयुगलस्य संभोगानन्तरं संयोगो भवति। एषा क्रिया गर्भाधानं दृढं करोति।[९] सम्पूर्णमानवजीवनं संस्कारस्य क्षेत्रे अस्ति अतः प्रजननमपि अत्रैव आगच्छति। धर्मसास्त्रानुसारम् अनेन सह अशुचितायाः भावः नास्ति।

अत एव विशेषतः गृह्यसूक्तेषु, स्मृतिग्रन्थेषु गर्भाधानेन एव संस्काराणाम् आरम्भो भवति। एष संस्कारः रात्रौ शुभमुहूर्ते करणीयो भवति। विष्णोः, प्रजापतेः, सरस्वत्याः स्तवनस्यावसरे भोजनस्यापि विधिः दर्शितोऽस्ति। मातुः एवं पितुः उत्तमविचारैः, उभयोः मन्थनेन च तेजस्विपुत्रस्य उत्पत्तिः भवति।[१०] अथर्ववेदस्य पञ्चमकाण्डस्य पञ्चविंशतितमे मन्त्रे प्रदत्तक्रिया संस्कारसम्बन्धिता प्रतीयते। अथर्ववेदस्य अयम् अंशः तृतीयपञ्चममन्त्रतः बृहदारण्यकोपनिषदः (६/४/२१तमे) मन्त्रे उद्धृतोऽस्ति।[११] गर्भाधानसंस्कारे गर्भाधानमुहूर्तस्यापि महत्त्वं विद्यते[१२] यथा त्रिविधं गन्डान्तं, जन्मतारा, मू. भ. अश्वि. रे. ग्रहणदिनं व्यतिपातवैधृतिश्राद्धदिनं दिवा परिघार्द्धम् उत्पातहतभं जन्मराशितोऽष्टमं पापग्रहस्य भवनं भद्रा पर्वदिनं ४/६/९/१४ तिथिषु सन्ध्यायां सू. मं. श. वासरान् रजोदर्शनाच्चतुर्थरात्रिपर्यन्तं न शुभः। उत्तरात्रय मृ. ह. अनु. रो. स्वा. श्र. ध. श. एषु भेषु लग्नात् १/४/५/७/९/१०भवने शुभः। तथैव लग्नात् ३,६,११ पापैश्चोत्तमः। सू. म. बृ. दृष्टे लग्ने विषमराशिनवांशके चन्द्रे शुभः। युग्म (६/८/१०/१२) रात्रौ चोत्तमं गर्भाधानम् चित्रा, पुन, पुष्याश्विनी एतद्भेषु मध्यमः स्यादिति। गर्भाधानमुहूर्तविचारः।[१३] अतः परं पुंसवनसंस्कारः- पुंसवनसंस्कारद्वारा पुत्रोत्पत्तिः भवति यथा संस्कारप्रकाशे उक्तं यत् पुमान् जन्म लभते येन तत् पुंसवनगीरितम्।[१४] पुंसवनशब्दः अथर्ववेदे (६/११/०१ तमे) मन्त्रे आगतो वर्तते। यस्य शाब्दिकार्थं वर्तते पुत्रस्य जन्मप्रदानम्। आश्वालायनगृह्यसूत्रे (१/१३/२/७ तमे) मन्त्रे संस्काराणां वर्णनं एतादृशं कृतं वर्तते यत् गर्भस्य तृतीयमासे तिष्य=पुष्य-नक्षत्रस्य दिवसे गर्भिणीगतपुनर्वसुनक्षत्रे

---

[८] निबन्धदशकम्, (डॉ.रमेशचन्द्रशुक्लः) , पृ.१६

[९] धर्मशास्त्रेतिहासः, पी. वी. काणे , पृ.१७८

[१०] निबन्धदशकम्, (डॉ.रमेशचन्द्रशुक्लः) , पृ.१६

[११] हृषीकेशपञ्चाङ्गम् , पृ.५

[१२] संस्कारप्रकाशः

[१३] धर्मशास्त्रेतिहासः, पी. वी. काणे , पृ.१८७ - १८८

[१४] हृषीकेशपञ्चाङ्गम्, पृ.५

उपवासं कृत्वा स्वतः सेमफलस्य रागं कृत्वा सवत्सयुक्तधेनोर्दुग्धे शिम्बिकस्य (सेमफलस्य) खण्डद्वयम् एवं यवस्यैककणं वारत्रयम् गर्भिण्यै दातव्यं भवति। पुरुषः पृच्छति भवती किं पिबति? तदा पत्नी वदेत् पुंसवनं (पुत्रस्योत्पत्तिम्) पिबामि एवं पतिः वारत्रयं एकेन यवफलेन सह दधि सेमफलद्वयं गृहीत्वा क्रियां करोति। संस्काररत्नमालाग्रन्थे पुंसवनसंस्कारस्य कृते होमकर्मणः अपि व्यवस्था कृता वर्तते। पत्युरभावे पत्युरनुजोऽपि एतत्संस्कारं कर्तुं शक्नोति। उपरोक्तसंस्कारः भोजननिर्मिताग्नौ करणीयो भवति।[१५]

**पुंसवनसंस्कारस्य मुहूर्तः हृषीकेशपञ्चाङ्गे यथा-** गर्भतः, द्वितीये तृतीये वा मासे पुंसवनकर्म विधेयम्। षष्ठे अष्टमे वा मासे मासाधिपतौ सबले सति सीमन्तोन्नयनं प्रशस्तं भवति। नात्र शुक्रेज्ययोमुढत्त्वदोषः सद्वाराः- सू. मं. वृ. एतेषु वारेषु मतान्तरेण ज्ञेन्दुशुक्रवारेषु वा दम्पत्योश्चन्द्रताराशुद्धौ सत्यां पुंसवनसीमन्तसंस्कारौ भवतः। सद्भानि मृ., पुष्य, मूल, श्रवण, पुन, हस्त, रेवती, रो. त्युत्तरा चेतद्भेषु सत्तिथयः प्रतिपदा, द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी, एकादशी, त्रयोदशी चेतेषु तिथिषु शुक्लपक्षे, दशमीं तिथिं यावत् कृष्णे चोत्तमः परन्तु पूर्वाह्ने एव कार्यं नापराह्ने। सल्लग्नम् - संस्कारद्वयं शुभस्याङ्गे पुभांसे च श्रेष्ठं तत्र लग्नात् १-४-५-७-९-१० एषु शुभैः ३,६,११, एषु पापैश्चोत्तमः चन्द्रे १/६/८/१२ वर्जिते श्रेष्ठः ५/८/१२ पाप एकोऽप्यसत् इति।[१६]

**अतः परं सीमन्तोन्नयनसंस्कारः-** सीमन्तोन्नयनशब्दस्य अर्थः वर्तते। भार्यायाः केशस्य उपरिविभाजनम्। अस्य संस्कारस्य वर्णनम् आश्वलायनः (१/१४/१/९), शांखायनः (१/२२), हिरण्यकेशीयः (२/१), बौधायनः (१/१०), भरद्वाजः (१/२१), गोभिलः (२/७/१-१२), खदिरः (२/२/२४-२८), पारस्करः (१/१५), काठकः (३१/१-४) एवं वैखानसः (३/१२) नामकगृह्यसूत्रेषु प्राप्यते। याज्ञवल्क्यः (१/११) एवं व्यासः (१/१८) अस्य संस्कारस्य केवलसीमन्तमिति संज्ञा प्रदत्ता वर्तते। गोभिलगृह्यसूत्रे (२/७/१) मानवगृह्यसूत्रे (१/१२/०२) एवं काठ्यगृह्यसूत्रे (३१/१) अयम् सीमन्तकरणसंस्कारः कथ्यते।

किन्तु आपस्तम्बगृह्यसूत्रे एवं भरद्वाजगृह्यसूत्रे (१/२१) अस्य पुंसवनसंस्कारात् पूर्वमेव उल्लेखः कृतः। आश्वलायनऋषिमतं वर्तते यद् चतुर्थे मासे सीमन्तोन्नयनसंस्कारः कर्तव्यः एवं क्षयपूर्वकं चन्द्रवारस्य चतुर्दश्यां तिथौ यदा चन्द्रः पुरुषनक्षत्रेण सह भवेत्। अथवा नारायणानुसारं पुल्लिंगनक्षत्रे सीमन्तोन्नयनसंस्कारः करणीयो भवति। आपस्तम्बबौधायनभारद्वाजपारस्कराः स्पष्टं लिखन्ति यद् अयं संस्कारः, सकृदेव प्रथमगर्भाधानस्य काले कर्तव्यो भवति। विष्णुधर्मसूत्रानुसारम् अयं संस्कारः स्त्रीणां

[१५] धर्मशास्त्रेतिहासः, पी. वी. काणे, पृ.१९०

[१६] हृषीकेशपञ्चाङ्गम्, पृ.५

मनोरञ्जनार्थं वर्तते।[१७] सीमन्तोन्नयनमुहूर्तः उपरोक्तपुंसवनमुहूर्तवत् भवति।

**जातकर्मसंस्कारः -** संस्कारोऽयं प्राचीनः वर्तते। तैत्तरीयसंहिता (२/२/५/३/४) एषु वयं पठामः यदा कस्यचित् पुत्रस्य उत्पत्तिः भवति तदा द्वादशविभिन्नपात्रेषु पक्करोटिकायाः (पुरोडाशस्य) बलिः वैश्वानराय दातव्यो भवति। सः पुत्रः यस्य कृते एषा इष्टिः भवति स पवित्रः गौरवपूर्णः धनधान्ययुक्तः वीरः एवं पशुयुक्तः भवति।[१८] बृहदारण्यकोपनिषदः (१/५/२) मध्येऽपि अस्य कृत्यस्य कृते संकेतः वर्तते यथा- यदा पुत्रस्य उत्पत्तिः भवति तदा सर्वप्रथमं विमलीकृत्य नवनीतं मुखे दातव्यं भवति। अनन्तरं मातुः स्तनस्य स्पर्शम् अपेक्षते। पारस्करगृह्यसूत्रानुसारं (१/१६) नालच्छेदनात् पूर्वमेव अयं संस्कारः भवति। अयमेव गोभिलस्य (२/७/१७) एवं खदिरस्य (२/२/३२) मध्येऽपि प्राप्यते।[१९]

**हृषिकेशषपञ्चाङ्गानुसारं जातकर्ममुहूर्तं यथा -** प्रतिपदातः सप्तमीपर्यन्तम् एवं दशमीतः त्रयोदशीपर्यन्तम् एतत्तिथिषु व्यतिपातभद्रासंक्रान्तिदोषरहितासु श्रेष्ठम्। तथैव सद्वाराः चन्द्रबुधगुरुशुक्रवारेषु जन्माहात् एकादशं/द्वादशं दिनं यावत् चोत्तमम्। एवं सद्भानि-मृगरेवतीचित्रानुरधात्त्युत्तरारोहिणीपुनर्वसुस्वातिधनिष्ठाश्रवणशतभिषापुष्यहस्तश्विनीषु सत्तनौ चाऽयं श्रेष्ठः।[२०]

**नामकरणसंस्कारः -** समस्तगृह्यसूत्रेषु सर्वप्रथमनियमः वर्तते यत् पुरुषस्य नाम समाक्षरात्मकम् (२/४) भवेत। एवमेव कन्यायाः विषमाक्षरयुक्तनामानि शुभानि भवन्ति। बृहदारण्यकोपनिषदि आश्वलायनशांखायनकाठकादिमते जन्मदिवसे नामकरणं विधेयम्। शतपथब्राह्मणपतञ्जलिमहाभाष्येऽपि एवमेव चर्चा कृता वर्तते। आपस्तम्बः, बौधायनः, भरद्वाजः पारस्कराचार्यश्च नामकरणस्य कृते दशमदिवसं मन्यन्ते। याज्ञवल्क्यः (१/१२) एकादशे दिवसे नामकरणस्य व्यवस्था प्रदत्ता अस्ति। बौधायनगृह्यसूत्रे (२/१/२३) दशमे द्वादशतमे वा दिवसे तथैव हिरण्यकेशिगृह्यसूत्रे द्वादशे दिने नामकरणं मन्यते।[२१] नामकरणमुहूर्तः हृषिकेशपञ्चाङ्गे यथा - सूतकान्ते नामकरणं कर्तव्यं स्वकुलोचितं बृहस्पतिः। तथैव दिवसे वापि जन्मतो दिवसे शुभे षोडशे विंशतिश्चैव द्वाविंशे वर्णतः क्रमात्। नक्षत्राणि यथा- मृगरेवतिचित्रानुराधात्त्युत्तरारोहिणीहस्तपुनर्वसुपुष्याश्विनीअभिजित्स्वातिश्रवणधनिष्ठाशतभिषा-नक्षत्रेषु वाराः चं.बु.-बृ.शु. एषु वारेषु १/२/३/४/५/११/१३ तिथौ भद्रादिरहिते सत्युत्तमः। लग्नम्-

---

[१७] धर्मशास्त्रेतिहासः, पृ.१९२ - १९३

[१८] हृषीकेशपञ्चाङ्गम्, पृ.५

[१९] धर्मशास्त्रेतिहासः, पृ.१९६

[२०] हृषीकेशपञ्चाङ्गम्, पृ.५

[२१] धर्मशास्त्रेतिहासः, पृ.२०२

२/५/८/११ एतद्भस्याङ्गेऽष्टमशुद्धौ शुभेलग्ने शुभांशेचोत्तमः। लग्नशुद्धिः- १/४/५/७/९/१०लग्नात् शुभ-लग्नाद् ३/६/११ पापैश्चोत्तमः। ६/८/१२ लग्नात् सर्वे न शुभाः। चन्द्रताराबले पितृपुत्रयोः दिवापुर्वाह्णे एवं कर्तव्यः। मध्याह्ने मध्यमं तदग्रे न कर्तव्यः। व्यतिपातसंक्रान्तिमाविधृतिग्रहणाहश्राद्धाहपक्ष-च्छिद्ररिक्तापूर्णाशकुनीकिस्तुघ्नविष्टिकरणादीन् वर्जयित्योक्ततिथ्यादिनामककर्मविहितम्। अथ विहित-कालातिक्रमे सतीदं गुरुशुक्रयोरस्तादिदोषरहिते सौम्यायने कार्यम्। नान्यथेति[२२]

**निष्क्रमणसंस्कारः -** पारस्करगृह्यसूत्रे (१/१७) बहुसंक्षेपेण अस्य वर्णनम् आगच्छति। गोभिले (२/८/१०७) खदिरे (२/३/१५) बौधायनगृह्यसूत्रे (११/०२) मानवगृह्यसूत्रे (१/१९/१६) काठकगृह्यसूत्रे (३७-३८) अस्य वर्णनं प्राप्यते। बहूनां मते अयं जन्मनः चतुर्थे मासे क्रियते। अपरार्ककस्य कथनानुसारं एकपुराणस्य मते अयं जन्मतः द्वादशे दिवसे चतुर्थमासे वा भवितुमर्हति। अस्मिन् पिता सूर्यस्य पूजां करोति। पारस्करगृह्यसूत्रानुसारेण पिता पुत्रं सूर्यं दर्शयति एवं मन्त्रोच्चारणं करोति। बौधायने अष्टाहुतिपरकहोमस्य वर्णनं वर्तते। गोभिलः चन्द्रदर्शनस्यापि प्रसङ्गं चर्चयति । यमः लिखति यत् सूर्यस्य एवं चन्द्रस्य दर्शनं क्रमेण तृतीये चतुर्थे मासे भवति। एवमेव अन्यधर्मशास्त्रकारैः स्वमतं प्रकाशितं कृतम्।[२३]

**निष्क्रमणमूहूर्तः हृषीकेशपञ्चाङ्गानुसारम् -** पञ्चाङ्गे अस्य मुहूर्तं प्रदत्तम्। शुभमुहूर्ते चतुर्थमासानन्तरं बालः वहिरागत्य सूर्यचन्द्रयोः दर्शनं करोति। एष एव विधिरत्र वर्तते। अत्र यात्रामूहूर्तं द्रष्टव्यम्। अयं संस्कारः दिवसे एव भवति।

**अन्नप्राशनसंस्कारः -** गृह्यसूत्रानुसारम् अयं संस्कारः षष्ठे मासे भवति। तावत् शिशुः आहारार्थं मातुः दुग्धमेव पिबति। गोः दुग्धमपि पातुं शक्यते। षड्मासानन्तरं तस्य शिशोः सर्वाङ्गीणविकासार्थं सुन्दरं गुणकारकं भोजनमावश्यकम्। अत्रावसरे पित्रा स्वस्तिवाचनं, गणेशपूजनं, भूर्भुवः स्वः इति मन्त्रस्य उच्चारणं क्रियते। अनन्तरं दधिदुग्धमधुघृतयुक्तं भोजनं शिशवे दातव्यं भवति।

**हृषीकेशपञ्चाङ्गे अन्नप्राशनमुहूर्तं यथा -** बालकानां षष्ठमासादारभ्य सममासेषु कन्यकानां पञ्चममासादारभ्य विषममासेषु कार्यम्। मासगणनासौरजान्नप्राशनं परमिति ज्ञेयम्। सद्भानि यथा-त्युत्तरा रो.मृ. रे. चि. अनु. ह. पुष्य. अश्विनी. अभि. पुन. श्र. ध. स्वा. श. एषु शुभम्। अथ सप्तसलाकाविद्धं ग्रहणभं त्याज्यम्। तिथयः- द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी, त्रयोदशी, पूर्णिमायां सत्। अन्येषु समः। वाराः - च. बु. बृ. शु. एतत्वारेषु श्रेष्ठः। लग्नादि- २,३,४,५,६,७,१०,११ एषु जन्माङ्गभयोर्मृत्युभस्याङ्कतदंशकञ्चहित्वा प्रशस्तं नान्यलग्ने।

[२२] धर्मशास्त्रेतिहासेः, पृ.२०४ - २०५

[२३] हृषीकेशपञ्चाङ्गम्, पृ.५

**चूडाकरणसंस्कारः -** सर्वधर्मशास्त्रकारैः अस्य संस्कारस्य वर्णनं कृतं वर्तते। चूडायाः तात्पर्यं वर्तते बालगुच्छः यः मुण्डितशिरसः उपरि स्थाप्यते। इमं शिखामपि कथ्यन्ते। अस्यैव नाम चुडाकरणं चूडाकरणसंस्कारो वा वर्तते यस्मिन् जन्मनः अनन्तरं प्रथमं मुण्डितशिरसः उपरि बालगुच्छः (शिखा) स्थाप्यते।

चूडादेवचौलः निर्मीयते। कारणम् णलयोरभेदः अतः उच्चारणे णः स्थाने लकारोऽपि भवति। संस्कारोऽयं विषमवर्षेषु भवति। संस्कारेऽस्मिन् हवनकर्म, ब्राह्मणभोजनम्, आशीर्वचनग्रहणं दक्षिणादानं चेत्यादीनि कृत्यानि भवन्ति। इदानीं सनातनधर्मावलम्बीनां जनानां लक्षणं वर्तते केवलं शिखाग्रहणम्। ऋषेः देवलस्य वचनं वर्तते यत् यज्ञोपवीतम्, शिखां विना कोऽपि धार्मिकं कृत्यं कर्तुं न शक्नोति। यदि कोऽपि मनुष्यः मूर्खतावशाद् अबोधकारणाद् वा शिखायाः कर्तनं करोति तदा तस्य पापमोचनं तप्तकृच्छ्रप्रायश्चितेन एव भवितुमर्हति।[२४]

**चौलमुहूर्तः हृषीकेशपञ्चाङ्गे यथा -** वर्षत्रयाद्विषमवर्षेजन्मतः विचैत्रोद्गयने भानौ चोत्तमं मनुमाप्रथमवर्षेऽपि सदुक्तं चौलम्। अत्र सद्नक्षत्राणि यथा ज्ये. मृग. रेव. चित्रा, हताश्विनी पुष्याभिजित्स्वातिपुनर्वसुः श्रवणधनिष्ठाशतभिषा एषु चन्द्रतारानुकूले सति शुभः।

**वाराः -** च. बु. बृ. शु. एतद्वारेषु भद्रादिदोषरहिते श्रेष्ठम्। सत्तिथयः २,३, ५,६,११,१३ एतस्मिन् तिथौ सिते परन्तु पूर्वाह्णे। शुभलग्ने २,३,४,६,७,९,१२ एतद्धस्य लग्नांशे श्रेष्ठोऽयम्।[२५]

**कर्णवेधसंस्कारः -** आधुनिककालेऽस्मिन् जन्मतः द्वादशतमे दिवसे अयं संस्कारः भवति। बौधायनगृह्यसूत्रे (१/१२) कर्णवेधः सप्तमे अष्टमे वा मासे कर्तव्यः, किन्तु बृहस्पत्यनुसारं अयं जन्मतः दशमे, द्वादशे, षोडशे वा दिवसे सप्तमे दशमे मासे कर्तव्यो भवति। स्मृतिचन्द्रिकायां बहुसंक्षेपेण इदं लिखितं विद्यते यत् कर्णवेधानन्तरं ब्राह्मणानां कर्तव्यो भवति। आधुनिककाले इदं कार्यं स्वर्णकारः करोति। बालिकायाः कर्णयोः नीचैः सूक्ष्मपदार्थेन (भाषायां तारेण) छिद्रं कृत्वा तस्य गोलाकारबन्धनं क्रियते। बालिकायाः प्रथमं वामकर्णे छिद्रं करणीयं भवति। निरुक्ततः (२/४) ज्ञानं भवति यत् प्राचीनकाले अयं संस्कारः प्रवृत्तः आसीत्।[२६]

**हृषीकेशपञ्चाङ्गे कर्णवेधमुहूर्तं यथा -** जन्माहात् द्वादशे एवं षोडशे दिवसे तथा षष्ठे, सप्तमे, अष्टमे मासे ततः विषमवर्षे कर्णवेधः शुभः। चैत्रपौषावमाजन्ममासचतुर्थमासस्य रिक्तामासस्यजन्मतारां हित्वा प्रशस्तः कर्णवेधः इति। सत्तिथयः- १/२/३/५/७/१२/१३/१५ एतत्तिथौ सिते कृष्णे च दशमीं

[२४] धर्मशास्त्रेतिहासः, पी. वी. काणे, पृ.२०१

[२५] हृषीकेशपञ्चाङ्गम्, पृ.५

[२६] धर्मशास्त्रेतिहासः, पी. वी. काणे, पृ.१७१

यावत् शुभः। वाराः- चं. बु. वृ. शु. एतत्वारेषु भद्रादिरहिते सत्युत्तमः। सद्भानि- पुनर्वसु अश्विनीहस्तपुष्याभिजित्मृगचित्रानुराधारेवतीश्रवणवसुभेषु चन्द्रबले सति प्रशस्तः। शुभलग्नम्- २,३,४,७,९,१२, एतद्भस्य लग्नेष्वंशेषु च सत्।

**लग्नशुद्धिः -** लग्नादष्टमभवनं संशुद्धं लग्नात्- १,३,४,५,७,१०,११ एषु शुभे तथा ३,६,११ एषु पापैश्चौत्तमः लग्नस्थे गुरौ कर्णवेधः शुभावहः।[२७]

**अक्षरारम्भः-** केषुचित् स्मृतिग्रन्थेषु अस्य वर्णनं नास्ति। केवलम् अपरार्के एवं स्मृतिचन्द्रिकाद्वारोद्धृतमार्कण्डेयपुराणे चोलिल्खितो वर्तते।[२८] यदा बालकस्य शिरः शिक्षां ग्रहितुं योग्यं भवति तदा विद्यारम्भसंस्कारः कर्तव्यो भवति। पुत्रेण सह पिता आचार्यं प्राप्नोति, पिता आचार्यं प्रार्थयति। संस्कारोऽयम् उत्तरायणे भवति। शुद्धो भूत्वा शुभे दिवसे सुगन्धिना युतः भवति। गुरोः गृहे गत्वा अक्षरज्ञानं करोति।[२९]

**चौलसंस्कारः -** तृतीयवर्षे चौलसंस्कारतः अष्टमवर्षपर्यन्तं बालकानां शिक्षाविषये गृह्यसूत्रं धर्मसूत्रञ्च मौने वर्तेते।

**हृषीकेषपञ्चाङ्गे यथाविद्यारम्भमुहूर्तः-** उत्तरायणे रवौ पञ्चमेऽब्दे गणेशविष्णुसरस्वतिलक्ष्मीकुलदेवान्नत्वा सविधिं सम्पूज्य च शिशोर्नूतनाक्षरलेखनारम्भः कार्यः। तिथयः-- २,३,५,६,१०,११,१२ तिथिषु दुर्योगादिरहितासु शुभः। वाराः- च. बु. वृ. शु. एषु वारेषु शुक्लपक्षे चाक्षरारम्भः शुभः। नक्षत्र- अश्विन्यार्द्रापुनर्वसुपुष्यहस्तचित्रास्वाती-अनुराधाश्रवण रे. एषु भेषु शुभः। सा. ल. शु.- २,३,६,९,१२ एतद्भस्याङ्गे तदशें चोत्तमः। अत्राष्टमशुद्धे कुम्भांशकं विनोनमः। खेस्थे जीवे बुधे लग्ने खेटवलाढ्ये श्रेष्ठोऽयम् अक्षरारम्भः।[३०]

**व्रतबन्धः -** व्रतबन्धः=उपनयनसंस्कारः। उपनयनस्य अर्थो वर्तते सन्निकटानयनम्, अतः उपनयनस्य अर्थः स्पष्टो भवति यत् शिक्षणार्थम् आचार्यस्य पार्श्वे आनयनम्। उपनयनसंस्कारस्य मूलं भारते ईरानदेशे च उपलभ्यते। अयं संस्कारः एवं वर्तते यद् विद्याग्रह्णोत्सुकबालकानाम् आदौ उपनयनसंस्कारो भवति पुनः गायत्रीमन्त्रं गृहीत्वा पश्चाद् विद्याग्रहणं कुर्वन्ति। उपनयनसंस्कारस्य कालः स्मृतिग्रन्थानुसारं गृह्यसूत्रानुसारं च एवमस्ति यद् अष्टवर्षीयब्राह्मणबालकस्य

---

[२७] निबन्धदशकम्, पृ.१७

[२८] हृषीकेशपञ्चाङ्गम्, पृ.५

[२९] निबन्धदशकम्, पृ.१७

[३०] हृषीकेशपञ्चाङ्गम्, पृ.५

एकादशवर्षीयक्षत्रियबालकस्य द्वादशवर्षीयवैश्यबालकस्य यज्ञोपवीतसंस्कारो भवति। संस्कारम् आचार्यः करोति। ततः बालकः ब्रह्मचारी व्रतस्य ग्रहणं कृत्वा वेदाध्ययनं करोति।[३१]

**हृषीकेषपञ्चाङ्गे उपनयनमुहूर्तः -** तत्र वृद्धत्वास्तशिशुत्वरहितयोः गुरुशुक्रयोः, उत्तरायणे रवौ मघादिपञ्चमासेषु शुभः। परन्त्वर्केन्दुगुरुशुद्धेषु चैत्रमासे मीनार्के सति ब्राह्मणानां व्रतबन्धः शुभः।

**सद्भानि-** अश्विनीहस्तपुष्यत्त्युत्तरारोहिणीश्लेशास्वातिपुनर्वसुश्रवणधनिष्ठाशतभिषमूलचित्रा अघ्नुराधापूर्वात्रयरेवत्यार्द्रानक्षत्रेषु वेधरहितेषु शुभः। परन्तु नापराह्ने । तिथयः - २,३,५,१०,११,१२ एतासु शुक्ले २,३,५ तिथिषु कृष्णे चोत्तमः। सद्वाराः - सू. चं. बु. वृ. शु. एतद्वारेषु भद्रारुगवाणादि दोषरहितेषु सत्त्युत्तमः।

**लग्नशुद्धिः -** त्रिषस्थाः खलाः सर्वे चन्द्रोद्विघ्नदिकत्रिगः। सौम्याः केन्द्रत्रिकोणस्थाः । भावशुद्धिः - लाभे सर्वे व्रते शुभाः /१/ च. शु. वृ. लग्नेशाः लग्नात् ६/८ न शुभाः। चन्द्रशुक्रौ लग्नात् द्वादशनिन्द्यौ (१/५/८) पापाः न शुभाः ६/८/१२ सौम्यायने शुभाः ३/६/११ पापाः शुभदाः। पूर्णेन्दुः वृषकर्कलग्नेषु श्रेष्ठः, अन्यथा अशुभः। लग्ने अर्कः शुभः चन्द्रांशं विना।[३२]

**चतुर्वेदसंस्कारः -** गौतमद्वारा (८/१५तमे) वर्णितसंस्कारसंख्यासु चतुर्वेदसंस्कारोऽपि वर्तते। बहवः स्मृतिकाराः षोडशसंस्कारेषु अस्य गणनां न कृतवन्तः। आश्वलायनस्मृतिपद्यानुगुणं चदुर्वेदव्रताः इत्थं वर्तन्ते यथा- (१) महानाम्नव्रतः (२) महाव्रतः (३) ऐतरेयारण्यकः (४) उपनिषद्व्रतः गोदानशंखायगृह्यसूत्रानुसारं पवित्रगायत्रीद्वारादीक्षितानन्तरं चदुर्वेदव्रतानि भवन्ति। अतः उपनयनसंस्कारानन्तरं वेदारम्भसंस्कारः भवति। एतस्मिन् संस्कारे बालकः गुरुकुलं प्राप्नोति तत्र च आचार्यसान्निध्ये वेदारम्भो भवति। ततः पूर्वं गणेशपूजनं, मातृपूजनं श्राद्धादिकर्म च आवश्यकानि भवन्ति। गुरुः लौकिकाग्नेः प्रतिष्ठां करोति ततः शिष्यः अङ्गस्य पश्चिमदिशायाम् उपविश्य आहुतिं दत्त्वा ऋग्वेदादिवेदानामारम्भं करोति।[३३]

**अतः विद्यारम्भमुहूर्तः -** हृषीकेशपञ्चाङ्गे यथा - आदौ अक्षरग्रहणे दृढसंजाते, सौम्यायने रवौ, आश्विने, कन्यार्के बुधप्राबल्ये च वेदारम्भव्रतं करणीयम्। तत्रादौ सद्वाराः- बु. सू. वृ. शु. एतद्वारेषु शुभः। गणेशं वाग्देवताञ्चाभ्यर्च्य कार्यः। सद्नक्षत्राणि- अश्विनीपुष्यार्दानुराधामृगपुनर्वसुः हस्तचित्रास्वातीश्रवणधनिष्ठामूलपूर्वात्रयं, श्लेषाशतभिषाम्। सत्तिथयः- २,३,५,६,१०,१२ एतत्तिथिषु सिते तथा कृष्णे तिथिपञ्चम्यामपि उत्तमः।

---

[३१] धर्मशास्त्रेतिहास, पृ.२५१

[३२] हृषीकेशपञ्चाङ्गम्, पृ.५

[३३] धर्मशास्त्रेतिहासः, पृ.२६१

**सांसलग्नम्-** २,३,६,९,१२ एतद्भस्याङ्गे शुभः। लग्नादष्टमे सर्वे ग्रहाः नेष्टाः। शुद्धिः- १,२,३,४,५,७,९,१०,११ एषु शुभः। ३,६,११ एषु उत्तमः पापग्रहेषु सत्स्वपि ।[३४]

**केशान्तसंस्कारः -** अस्मिन् संस्कारे शिरसः तथा शरीरस्य विविधस्थलस्थकेशानाम् कर्तनं भवति। प्रायः स्मृतिकाराः संस्कारोऽयं षोडशवर्षे करणीयः इति सूचयन्ति। मनुस्मृतिः (२/६५) इत्यनुसारेण ब्राह्मणानां षोडशे वर्षे क्षत्रियाणां द्वाविंशे वर्षे, वैश्यानां चतुर्विंशे वर्षे संस्कारोऽयं कर्तव्यः। लघु आश्वलायनस्मृतिः - (१४/१) मतानुसारेण गोदानं षोडशवर्षे विवाहकाले वा कर्तव्यमिति सूचयति अयमेव गोदानसंस्कारः।[३५] हृषीकेषपञ्चाङ्गे केशान्तमुहूर्तः भिन्नो न दत्तः, अतः चौलमुहूर्तव्रतग्रहणं करणीयमिति।

**समावर्तनसंस्कारः -** यदा गुरुकुलात् ब्रह्मचारी स्वगृहं प्रति आगच्छति तदा अयं संस्कारो भवति। विद्यासम्पन्नब्रह्मचारी सम्यक् स्नानं कृत्वा गृहं प्रति आगच्छति। ततः स्नातकः गुरोः आचार्यस्य च आज्ञया गृहस्थाश्रमं प्रविशति। समावर्तनस्य शाब्दिकार्थो वर्तते गुरुगृहात् स्वगृहागमनमिति।[३६]

**विवाहसंस्कारः -** संस्कारोऽयं महत्त्वपूर्णसंस्कारः, यज्ञरूपसंस्कारः सामाजिकीक्रिया वा वर्तते एवं नास्ति। अपितु धार्मिकगृहस्थजीवनस्य एका चेतना वर्तते। द्वयोः सम्मेलनेन जीवनस्य गतिर्भवति प्रणयबन्धरुपसंस्कारः दाम्पत्यसूत्रे बध्नाति। अनेन संस्कारेण संसारस्य समाजस्य च स्थितिः भवति। अनेन च द्वितीयाश्रमस्य प्रारम्भो भवति।[३७] मुहूर्तचिन्तामणौ पञ्चाङ्गे च अस्य मुहूर्तस्य प्राप्तिर्भवति।

**भारतीयजीवनस्य अन्तिमः संस्कारः अन्त्येष्टिसंस्कारः –** अत्र संस्कारेऽस्मिन् दैहिकजीवनं पूर्णं भवति। विविधसंस्कारैः सुसंस्कृतं जीवनं यदा पूर्णं भवति तदा एकेन संस्कारेण अस्य अन्तो भवति। मृत्योरनन्तरं शरीरं श्मशानं गच्छति। अग्निना वैदिकमन्त्रोच्चारणेन च दहनं भवति। एष संस्कारः यज्ञरूपः एकः संस्कारो विद्यते। प्रेतत्त्वनिवृत्त्यर्थं दश दिनानि यावत् नदीतटे उदकदानं पिण्डदानं च भवति। एवं प्रकारेण शास्त्रे गृह्यादिसूत्रेषु स्मृतिग्रन्थेषु च संस्काराः विवर्णिताः सन्ति। संस्काराणां मानवजीवने महन्मूल्यं वर्तते। जन्मतः मृत्युपर्यन्तं संस्काराणां क्रमः मुनिभिः ऋषिभिश्च दर्शितः। एते संस्काराः मुख्यरूपेण धर्मशास्त्रेतिहासनामके ग्रन्थे विशेषतया विवर्णिताः सन्तिः।[३८]

---

[३४] निबन्धदशकम्, पृ.१२

[३५] निबन्धदशकम्, पृ.१२

[३६] निबन्धदशकम्, पृ.१२

[३७] श्रीमद्भागवतम् / निबन्धदशकम्, पृ.१२

[३८] हृषीकेशपञ्चाङ्गम्, पृ.५

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रियानिष्क्रमणोऽन्नप्राशनं वचनं क्रिया॥**
**कर्णवेधो व्रताद्देशो वेदारम्भः क्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहे॥**
**प्रेताग्नि संग्रहश्चेति संस्काराः षोडशैव हि।**
**भवेतां कर्णवेधानां मन्त्रवर्ज्यं क्रियास्त्रयः॥**[३९]

तथैव गृहीतक्रमप्रमाणं यथा -

**गर्भाधानमतश्चपुंसवनकं सीमन्तजाताभिषे।**
**नामाख्यं सहनिष्क्रमेण च तथाऽन्नप्राशनं कर्म च॥**
**चुडाख्यो व्रतबन्धकोऽप्यथचतुर्वेदव्रतानां पुनः।**
**केशान्तः सविसर्गकः परिणयः स्यात् षोडशीकर्मणाम्॥**[४०]

**उपरोक्तसंस्काराणामाधुनिकयुगे महत्त्वम् -** संस्कारान्ते क्रियाः सर्वाः योग्यतां चादधानाः अर्थात् संस्कारस्य अन्ते याः क्रियाः सन्ति ताः योग्यतां प्रददति। संस्कारद्वारा नवीनगुणानां प्राप्तिर्भवति। आधुनिकयुगे गर्भाधानोपनयनविवाहसंस्कारान् परित्यज्य अन्ये ये संस्काराः सन्ति, तान् संस्कारान् इदानीं प्रायः जनाः न कुर्वन्ति। ब्राह्मणाः अपि सम्पूर्णसंस्कारान् न कुर्वन्ति तर्हि अन्येषां जनानां का कथा। प्रायः ये द्विजाः संस्कारान् न कुर्वन्ति ते प्रायश्चित्तस्य भागिनः भवन्ति। तेषां दानविधानानि सन्ति तत् प्रायश्चित्तं दानविधानमवश्यमेव व्यवहर्तव्यमिति।[४१] दानं दत्वाऽपि पुनः संस्कारान् कुर्वन्तु यदि संस्काराः निर्धारितकाले न कृताः सन्ति। अतः अवश्यमेव संस्कारैः संस्कृताः भवन्तु।

## सन्दर्भग्रन्थाः

१. धर्मशास्त्रेतिहासः
२. हृषीकेशपञ्चाङ्गम्
३. श्रीमद्भागवतम्
४. निबन्धदशकम्
५. संस्कारप्रकाशः

---

[३९] धर्मशास्त्रेतिहासः, पृ.१८०
[४०] धर्मशास्त्रेतिहासः, पृ.१८०
[४१] धर्मशास्त्रेतिहासः, पृ.१८०

वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# रसगङ्गाधरे उत्तमोत्तमकाव्यस्योदाहरणे व्यङ्ग्यविमर्शः

**जिगर एम्. भट्टः***

किं नाम काव्यमिति प्रश्ने यथा आचार्याणां मतान्तराणि दृश्यन्ते तथैव कतिविधं काव्यं स्यादित्यपि प्रश्ने सन्ति मतान्तराणि। आचार्यमम्मटः त्रिविधं काव्यं प्रत्यपादयत् - उत्तमं मध्यमम् अधमम् अथवा ध्वनिकाव्यं[१] गुणीभूतव्यङ्ग्यकाव्यं[२] चित्रकाव्यं[३] चेति। विश्वनाथस्तु द्विविधमेव काव्यम् अमन्यत[४] - ध्वनिकाव्यं[५] गुणीभूतव्यङ्ग्यकाव्यम्[६] इति। किन्तु रसगङ्गाधरकारः पण्डितराजजगन्नाथः विशेषतया चतुर्विधं काव्यं[७] मनुते – उत्तमोत्तमम्[८] उत्तमं[९] मध्यमम्[१०] अधमं[११] च।

## उत्तमित्तमोकाव्यलक्षणम्

चतुर्षु काव्येषु उत्तमोत्तमस्य किं लक्षणं तथा कथं तस्य उत्तमोत्तमत्वम् इति पश्यामः। पण्डितराजजगन्नाथः उत्तमोत्तमकाव्यं लक्षयति यथा - **शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थम्**

---

* सहायकाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् - ३६२२६६

[१] इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः। काव्यप्रकाशः १.४

[२] अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्। तत्रैव १.५

[३] शब्दचित्रं वाच्यचित्रम् अव्यङ्ग्यं त्ववरं स्मृतम्। तत्रैव १.५

[४] काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यंचेति द्विधा मतम्। साहित्यदर्पणः ४.१

[५] वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्। तत्रैव ४.१

[६] अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये। तत्रैव ४,१३

[७] तच्चोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा। रसगङ्गाधरः प्रथमाननम्, पृ.३७

[८] शब्दार्थौ यत्र गुणीभावितात्मानौ कम्प्यर्थनभिव्यङ्क्तस्तदाद्यम्। तत्रैव पृ.३७

[९] यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणम् तदिद्वितीयम्। तत्रैव पृ.६६

[१०] यत्र व्यङ्ग्यचमत्कारासमानधिकरणो वाच्यचमत्कारस्तत्तृतीयम्। तत्रैव पृ.७६

[११] यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम्। तत्रैव पृ.७८